## दशमः पाठः

# सुभाषचन्द्रः

सप्तनवत्युत्तराष्टादशशततमेऽब्दे (१८९७) जनवरी मासस्य त्रयोविंशतितिथौ श्रीसुभाषः स्वजन्मना बङ्गभुवमलञ्चकार। अस्य पिता जानकीनाथवसुः राजकीय-प्राड्विवाकः आसीत्। सुभाषः बाल्यादेव बुद्धिमान्, धीरः, साहसी, प्रतिभासम्पन्नश्चासीत्। अयं कलिकातानगर्यां शिक्षां प्राप्य सम्मानिताम् आई० ए० एस० परीक्षामुत्तीर्यापि विदेशीयशासनस्य भृत्यत्वं न स्वीकृतवान्।

आङ्ग्लशासकानां भारते नाधिकारः, ते विदेशीयाः कथमत्र शासनं कुर्वन्ति इति चिन्तापरोऽयं स्वप्रयत्नेन भारतवर्षस्य स्वातन्त्र्यार्थं बहून् भारतीयान् स्वपक्षे अकरोत्। एवं विधेभ्यः अस्योग्रविचारेभ्यः भीताः आङ्ग्लशासकाः इमं पुनः पुनः कारागारे अक्षिपन् परं वीरोऽयं स्वातन्त्र्यार्थं स्वप्रयासं नात्यजत्।

सप्तत्रिंशदुत्तरैकोनविंशतिशततमे (१९३७) वर्षे त्रिपुरा कांग्रेसाधिवेशने अयं सर्वसम्मत्या सभापतिः वृतः, अस्य सम्मानार्थञ्च पञ्चाशद्वृषभयुक्ते रथेऽस्य शोभायात्रा नागरिकैः सम्पादिता।

'अहिंसामात्रेण स्वातन्त्र्यप्राप्तेः प्रयासः कल्पनामात्रमेव' इति निश्चित्य सः क्रान्तिपक्षमङ्गीकृतवान्। अस्योग्रक्रान्तेः भीताः आङ्ग्लशासकाः पुनरिमं कलिकातानगर्यां कारागारे अक्षिपन्। कष्टकरमिमं वृत्तान्तं श्रुत्वा सुभाषानुरक्तानां भारतीयानां हृदयं व्यदीर्यत। एकदा रात्रौ निद्रावशीभूतेषु कारागारनिरीक्षकेषु वीरोऽयं सहसा समुत्थाय 'शठे शाठ्यं समाचरेत्' इति नीतिमनुसरन्, स्वेष्टसिद्धिं कामयमानश्च सिद्धिदात्रीं जगदम्बां संस्मृत्य कारागाराद् बहिर्गतः।

प्रातः सुभाषमनवलोक्य सर्वे कारागारनिरीक्षकाः आश्चर्यचकिता जाताः, भृशमन्विष्यापि ते प्राप्तुं नाशक्नुवन्। कारागाराद् बहिरागत्य सुभाषः वेषपरिवर्त्तनं विधाय पुरुषपुर (पेशावर) नगरमगच्छत्। तत्र उत्तमचन्द्रनाम्नः वणिजो गेहे कञ्चित् कालमवसत्। ततश्च आङ्लशासकैः अवधानपूर्वकं निरीक्षणे कृतेऽपि 'जियाउद्दीन' इति नाम्ना 'जर्मन' देशं गतः। तत्रत्यशासकेन हिटलर नामकेन सह मैत्रीं विधाय वायुयानेन जयपाणि (जापान) देशं गतः।

मलयदेशे स्वसङ्घटनकौशलेन 'आजाद हिन्द फौज' इत्याख्यां सेनां सङ्घटितवान्। अस्यास्मिन् सङ्घटने हिन्दुयवनादिसर्वसम्प्रदायावलम्बिनः राष्ट्रानुरागिणः वीरवराः सम्मिलिता आसन्। अस्य सङ्घटनस्य अभिवादनपदम् 'जय हिन्द' इति, उद्घोषश्च 'दिल्ली चलत' इत्यासीत्।

'यूयं मह्यं रक्तमर्पयत, अहं युष्मभ्यं स्वतन्त्रतां दास्यामि' इति रोमाञ्चकरः शब्दसमूहः सुभाषस्य मुखात् येनापि श्रुतः सः त्वरितमेव तेन सह स्वातन्त्र्यसंग्रामे सैनिकरूपेण अवतीर्णः। तस्मिन्नेव समये ब्रह्मदेशनिवासिनीभिः नारीभिः स्वभूषणैः सह सौभाग्यसूचकानि स्वर्णसूत्राण्यपि सुभाषचरणयोरर्पितानि।

'दिल्ली चलत, दिल्ली नातिदूरे वर्तते' इत्येतैः सुभाषस्य प्रोत्साहनवचनैः सैनिकाः दिल्लीं प्रति प्रस्थिताः। एतदन्तरे एव दुर्भाग्यवशात् जयपाणिदेशस्य पराजयात् सुभाषस्य सर्वे सैनिकाः आङ्लशासकैः बन्दीकृताः।

अस्य वीरवरस्य स्वातन्त्र्यप्राप्तेः कामना सप्तचत्वारिंशदुत्तरैकोनविंशतिशततमेऽब्दे (१९४७) अगस्तमासस्य पञ्चदशतिथौ पूर्णा जाता। अद्यास्माकं मध्येऽनुपस्थितोऽपि सुभाषः 'कीर्तिर्यस्य स जीवति' इत्युक्त्या सदैवामरः इति सुनिश्चितम्।

# अभ्यास प्रश्न

## ➠ लघु उत्तरीय प्रश्न

१. कारागाराद् बहिरागत्य सुभाषचन्द्रः वेषपरिवर्तनं विधाय कुत्रागच्छत्?
२. सुभाषस्य जन्म कुत्र अभवत्?
३. सुभाषस्य पितुः नाम किम् आसीत्?
४. सुभाषचन्द्रस्य सङ्घटनस्य किं नाम आसीत्?
*अथवा* सुभाषचन्द्रः मलयदेशे कां सेनां संघटितवान्?
५. सुभाषचन्द्रस्योग्रक्रान्ते भीताः आङ्ग्लशासकाः किमकुर्वन्?
६. सुभाषचन्द्रः कं देशं स्वजन्मना अलंचकार?
७. सुभाषचन्द्रः कां नीतिम् अन्वसरत्?
८. सुभाषस्य सङ्घटनस्य उद्घोषः कः आसीत्?
*अथवा* कस्य उद्घोषः 'दिल्ली चलत' इति आसीत्?
९. आजाद-हिन्द-सेनां कः सङ्घटितवान्?
१०. आजाद-हिन्द-फौजस्य अभिवादन पदं किम् आसीत्?
११. सुभाषस्य कः रोमाञ्चकरः शब्दसमूहः आसीत्?
१२. सुभाषचन्द्रः केन नाम्ना जर्मनदेशं गतः?
१३. सुभाषचन्द्रः कस्यां नगर्यां शिक्षां प्राप्तवान्?
१४. सुभाषचन्द्रः कां सेनां सङ्घटितवान्?

## ➠ अनुवादात्मक प्रश्न

**१. निम्नलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए—**

(क) आङ्ग्लशासकानां ................................ नात्यजत्।
(ख) प्रातः सुभाषमनवलोक्य ............ 'जर्मन' देशं गतः।
(ग) अहिंसामात्रेण ..................................... बहिर्गतः।
(घ) यूयं मह्यं ..........................सुभाषचरणयोरर्पितानि।
(ङ) यूयं मह्यं.........................................प्रस्थिताः।
(च) दिल्ली चलत ..................................बन्दीकृताः।
अथवा अस्य वीरवरस्य .............................. सुनिश्चितम्।
(छ) सप्तनवत्युतराष्ट्र .........................स्वपक्षे अकरोत्।

**२. निम्नलिखित पंक्तियों की ससन्दर्भ हिन्दी-व्याख्या कीजिए—**

(क) शठे शाठ्यं समाचरेत्।
(ख) यूयं मह्यं रक्तमर्पयत्, अहं युष्मभ्यं स्वतन्त्रतां दास्यामि।

(ग) कीर्तिर्यस्य स जीवति।

(घ) अहिंसामात्रेण स्वातंत्र्यप्राप्ते: प्रयास: कल्पनामात्रमेव।

(ङ) दिल्ली नातिदूरे वर्तते।

**३. निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) श्री सुभाषचन्द्र साहसी व्यक्ति थे।

(ख) दिल्ली दूर नहीं है।

(ग) अहिंसा परम धर्म है।

## ➨ व्याकरणात्मक प्रश्न

**१. निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए–**

सूत्राण्यपि, परोऽयम्,अत्रैव।

**२. निम्नलिखित में सन्धि कीजिए–**

वीर: + अयम्। बहि: + गत:। तत: + च।

**३. निम्नलिखित में विभक्तियों का उल्लेख कीजिए–**

जन्मना, नगर्याम्, भारते, वृत्तान्तम्, रात्रौ।

## शब्दार्थ

**प्राड्विवाकः** = सरकारी वकील। **भृत्यत्वम्** = नौकरी। **वृत्तः** = चुने गये। **भीताः** = डरे हुए। **व्यदीर्यत** = फट गया। **कामयमानः** = चाहते हुए। **त्वरितमेव** = तुरन्त ही। **संस्मृत्य** = स्मरण करके। **बन्दीकृताः** = बन्दी बना लिये गये।

●●